## ५९. परिचयपाठः

षष्ठी - भवतः, भवत्याः, मम

आचार्यः - सर्वेभ्यः स्वागतम् । नमस्कारः । मम नाम शम्भुनाथः । भवतः नाम किम् ?

श्रीधरः - मम नाम श्रीधरः ।

आचार्यः - भवत्याः नाम किम् ?

पूनम् - मम नाम पूनम् ।

आचार्यः - अरविन्द ! भवतः जनकस्य नाम किम् ?

अरविन्दः - मम जनकस्य नाम गिरीशः ।

आचार्यः - श्रीधर ! अत्र आगच्छतु । अहं भवतः नासिका इति वदामि । भवान् मम नासिका इति वदतु । भोः छात्राः भवन्तः श्रीधरस्य नासिका इति वदन्तु ।

आचार्यः - भवतः कर्णः ।

श्रीधरः - मम कर्णः ।

छात्राः - श्रीधरस्य कर्णः ।

आचार्यः - भवतः पादः भवतः हस्तः, भवतः शिरः, भवतः वदनम् इत्यादि ।

श्रीधरः - मम पादः, मम हस्तः.... मम शिरः,.... मम वदनम्..... ।

आचार्यः - श्रीधरस्य पादः, श्रीधरस्य हस्तः श्रीधरस्य शिरः, श्रीधरस्य वदनम्.... ।

आचार्यः - भवत्याः पुस्तकम्.... एवमेव ।

लता - मम पुस्तकम् ।

छात्राः - लतायाः पुस्तकम् लतायाः लेखनी... ।

आचार्यः - भगिनी-गृहम् इति वदामि, परिष्कारं कुर्वन्तु ।

छात्राः - भगिन्याः गृहम् ।

आचार्यः - गृहं-चित्रम् इति वदामि ।

छात्राः - गृहस्य चित्रम् ।

आचार्यः - अहम् उत्तराणि वदामि-भवन्तः प्रश्नान् वदन्तु ।

आचार्यः - मम नाम गिरीशः ।

छात्राः - भवतः नाम गिरीशः ।

आचार्यः - पुस्तकस्य नाम बालसरिता ।

छात्राः - पुस्तकस्य नाम किम् ?

आचार्यः - श्वः पुनः एतस्य पाठं कुर्मः ।